दिनाङ्क :- 18/02/2025 सायम् - 06:20

<u>आदौ मुख्यवार्ताः</u>

- प्रधानमन्त्रिणा श्रीनरेन्द्र-मोदिना कतर-देशस्य अमीर शेख-तमीम-बिन-हमद-अल-थानीत्यमुना साकं कृता द्वै-पाक्षिकी मन्त्रणा।
- भारत- यू.ए.ई-देशाभ्यां कार्यनीतिक-साहमत्यस्य वर्धनार्थं कृतानि महत्वपूर्णानि हस्ताक्षराणि।
- केन्द्रीय-गृह-मन्त्री अमितशाहः जम्मू-कश्मीरे नूतनापराधिक-विधि-नियमानां कार्यान्वयनार्थं समनुष्ठितं समीक्षोपवेशनं अध्यक्षितवान्।
- प्रशासनेन सर्वकारीय-वेब-फलकेषु, आभासीय-मञ्चेषु च समरूपताम् आपादयितुं डिजिटल ब्रांड-मैनुअल इति आभासीयोत्पाद-अभिज्ञान-विधानम् प्रख्यापितम्।
- महिला-प्रीमियर-लीग-क्रिकेट-क्रीडायाम् अद्य गुजरात-जायंट्स-दलस्य स्पर्धा मुंबई-इंडियंस-दलेन साकं भविष्यति वडोदरायाम् ।
- एफ.आई.एच. प्रो लीग हॉकी स्पर्धायां भारतीय-पुरुष-दलम् अद्य सायम् भुवनेश्वरे जर्मनी-दलेन, महिला-दलं च स्पेन-दलेन साकं स्पर्धिष्येते।

"भारत-कतर-साहमत्यम्" (HL-1/2)

प्रधानमन्त्रिणा श्रीनरेन्द्र-मोदिना अद्य नव दिल्ल्यां कतर-देशस्य अमीर-शेख -तमीम-बिन-हमद-अल-थानी इत्यनेन साकं द्वैपाक्षिकं मन्त्रणोपवेशनम् आचरितम्। अस्मिन् उपवेशने भारतस्य पक्षत: विदेशमन्त्री डॉ. एस. जयशंकर:, वित्तमन्त्री निर्मला सीतारामन्, वाणिज्योद्योग-मन्त्री पीयूषगोयल:, राष्ट्रिय-सुरक्षा-सम्मर्ष-दाता अजीत-डोभाल: अन्ये च वरिष्ठा: अधिकारिण: उपातिष्ठन्त। उपवेशने कतर-देशस्य मन्त्रिणां वरिष्ठाधिकारिणां च एकम् उच्चस्तरीयं प्रतिनिधिमण्डलमपि उपस्थितम् आसीत्। उपवेशनात् पूर्वं, प्रातः अमीरस्य राष्ट्रपति-भवनस्य प्रांगणे औपचारिक-रूपेण स्वागत-सपर्या सम्पन्ना आसीत्। एतस्मिन् अवसरे राष्ट्रपति: द्रौपदीमुर्मू, प्रधानमन्त्री मोदी अन्ये च नैके केन्द्रीय-मन्त्रिण: उपस्थिता: आसन्। अत्रावसरे उभाभ्यामपि नेतृभ्यां भारत-कतरयो: सम्बन्धानां सुदृढीकरणार्थं प्रतिनिधिमण्डल-स्तरीयं सम्भाषणं साधितम्।

अस्य मन्त्रणोपवेशनस्य अवसरे, प्रधानमन्त्री मोदी अमीर-शेख-तमीमश्च विभिन्न-क्षेत्रेषु सहयोगस्य संवर्धनार्थं भृशं परिचर्चां कृतवन्तौ। एताभ्यां व्यापार-निवेश-ऊर्जा-सुरक्षा-सदृशेषु प्रकरणेषु विस्तारेण चर्चा कृता। अत्रान्तरे भारत-

यू.ए.ई-देशाभ्यां कार्यनीतिक-साहमत्यस्य वर्धनार्थं महत्वपूर्णानि हस्ताक्षराणि अपि कृतानि सन्ति।

प्रधानमन्त्रिणा मोदिना एतद् उपवेशनं "अद्भुतम्" इति प्रतिपाद्य प्रोक्तं यत् एतत् भारत-कतरयो: मध्ये सम्बन्धान् सुदृढीकर्तुम् एक: महत्वपूर्ण: पदक्षेप: अस्ति।

## अमितशाह:- जम्मू-कश्मीरापराधिक-विधिनियम: (HL-3)

केन्द्रीय-गृहमन्त्री अमितशाह: अद्य जम्मू-कश्मीरे नूतनापराधिक-विधिनियमानां कार्यान्वयनार्थं नव-दिल्ल्यां एकं समीक्षोपवेशनम् अध्यक्षितवान्। अस्मिन् समीक्षोपवेशने जम्मू-कश्मीरस्य उपराज्यपाल: मनोज-सिन्हा वर्य:, मुख्यमन्त्री उमर अब्दुल्ला, वरिष्ठा: अधिकारिणश्च सम्मिलिताः अभूवन्। उपवेशने जम्मू-कश्मीरे आरक्षिबलस्य, कारागाराणां, आपराधिकाभियोजनस्य विभिन्नानां नूतनानां प्रावधानानां कार्यान्वयनस्य तेषां वर्तमान-रूपस्य च समीक्षा विहिता। उपवेशनस्य अनन्तरं सञ्चार-माध्यमानां वार्त्ताहरै: साकं सम्भाषमाण: मुख्यमन्त्री उमर अब्दुल्ला प्रावोचत् यत् एतेषां नूतन-विधि-नियमानां विषये जम्मू-कश्मीरस्य जनेषु जागरूकता-वर्धनार्थं प्रयासा: करिष्यन्ते।

## महाकुम्भवार्ता

महाकुम्भस्य पवित्रे अवसरे अपारोत्साहेन श्रद्धालव: त्रिवेणीसंगमे पुण्यस्नानम् आचारन्त: सन्ति श्रूयतां तावत् अस्माकम् वार्ताहराया: कुम्भविवरणम्।

*महाराष्ट्रस्य नासिकतः वरिष्ठाधिकारिणां विंशति-सदस्ययुत-दलं सप्तविंशत्यधिक-द्विसहस्रतमे वर्षे भविष्यमाणस्य नासिक-त्र्यम्बकेश्वर-कुम्भस्य सज्जतायै प्रयागराजे महाकुम्भस्य अध्ययनं करिष्यति। दलमिदं ह्यः प्रयागराजं सम्प्राप्तम् अथ इदं महाकुम्भे उत्तरप्रदेश-प्रशासनेन कृतानां प्रबन्धनानां विभिन्न-व्यवस्थानां च निरीक्षणं करिष्यति। अस्माकं वार्ताहरेण संसूचितं यत् अत्रत्य अनुभवं नासिक-कुम्भस्य आयोजनाय प्रयुज्यते।अस्य दलस्य नेतृत्वं नासिक-विभागायुक्तः प्रवीण-गेडम् इत्येषः करोति, अनेन सह नासिकस्य जनपदाधिकारी जलज-शर्मा तथा च आरक्षि-महानिरीक्षक: दत्तात्रेय-कराले: स्तः। इदं दलं राज्यप्रशासनेन कृतानाम् उपक्रमाणाम् अध्ययनाय अद्य श्वः च महाकुम्भस्य विभिन्नानां स्थलानां यात्राम् करिष्यति। विशेषतया जनसम्मर्दस्य नियन्त्रणं, आपत्काल-प्रतिक्रियाः, यातायातं, परिवहनं, नौकाश्रयं, नदीजलप्रबन्धनं, स्वास्थ्य-चिकित्सा-व्यवस्था, आवासं, स्वच्छता, अपशिष्टप्रबन्धनं, पेयजल-शौचालय-सौविध्यम् इत्येतेषां स्थितीनां अध्ययनं करिष्यति। श्रीगेडम् इत्येषः अवदत् यत् अस्य वर्षस्य प्रयागराज-महाकुम्भस्य प्रबन्धनम् अद्वितीयम् अनुकरणीयम्चअस्ति।(संस्कृतवार्तांकक्षतः, ऋचा झा)*

## प्रधानमन्त्री रामकृष्ण परमहंस:

प्रधानमन्त्री श्री नरेन्द्र मोदी अद्य स्वामिनो रामकृष्ण परमहंसस्य जन्मजयन्त्या: अवसरे तस्मै श्रद्धाञ्जलीन् समार्पयत्। सामाजिक-

सञ्जालीये सन्देशे श्रीमोदी व्यलिखत् यत् स्वामिनो रामकृष्ण परमहंसस्य मातरं कालीं प्रति सुदृढा भक्तिरेव तस्य अनुयायि-जनेषु भृशं प्रभावम् अजनयत् ।

## आभासीयम् उत्पादनम् (HL-4)

प्रशासनेन अद्य डिजिटल ब्रांड इत्यस्य आभासीय उत्पादनस्य अभिज्ञानार्थं मैनुअल विधानं प्रख्यापितम् अस्ति। यस्योद्देश्य: प्रशासनस्य वेब-फलकानां डिजिटल प्लेटफॉर्म इति आभासा-ङ्कीय-मञ्चानां च एकरूपताया: आपादनं वर्तते। सूचना-प्रौद्योगिकी-राज्य-मन्त्री जितिन-प्रसाद: नव दिल्ल्याम् एतद् मैनुअल आख्यं विधानं प्रवर्तितवान्। अस्य मैनुअल-विधानस्य माध्यमेन सर्वकारेण सर्वकारीयेषु आभासीयेषु मञ्चेषु समान-दृश्याभिज्ञानस्य स्थापनार्थं एका महती मार्गदर्शिका विरचिता अस्ति। एतद् मैनुअल विधानं सर्वकारीय-वेब-फलकेषु आभासीय-मञ्चेषु च एकरूपता-प्रतिपादनार्थं सहाय्यम् आचरिष्यति। सर्वत्र सर्वकारस्य आभासीयां उपस्थितिम् अपि सुदृढीकरिष्यति।

एतस्मिन् अवसरे , जितिन-प्रसाद: प्रोक्तवान् यत् भारतं प्रधानमन्त्रिणो नरेन्द्र-मोदिनो नेतृत्वे आई.टी. महाशक्ति-रूपेण समुदेति। अमुना विश्वास: व्यक्तीकृतः यत् एष: महत्वाकांक्षी उपक्रम: देशस्य सभासीय-पारिस्थितिकीयं तन्त्रं सुदृढं कृत्वा प्राविधिकं नवाचारं वर्धयिष्यति।

## हॉकी/क्रिकेट (HL- 5/6)

हॉकी एफ्.आइ.एच्. प्रो लीग् इत्येतस्यां क्रीडा-स्पर्धायां भारतीय-पुरुष-दलं जर्मनी-दलं सम्मुखीकरिष्यति, सहैव अद्य सायङ्काले ओडिशायाः

भुवनेश्वरस्य कलिङ्ग-हॉकी-क्रीडाङ्गणे भारतीय-महिलादलं स्पेन-दलं सम्मुखीकरिष्यति। भारतीय-पुरुष-दलस्य नेतृत्वं हरमनप्रीतसिंहः करोति।

विमेन्स्-प्रीमियर्-लीग्-क्रिकेट्-क्रीडायां सायङ्काले तस्मिन् एव स्थाने गुजरात्-जायण्ट्स्-दलं मुम्बई-इण्डियन्स्-दलं सम्मुखीकरिष्यति। गतरात्रौ वडोदरायाः कोटाम्बी-क्रीडाङ्गणे रॉयल्-चैलेञ्जर्स्-बेङ्गलुरु-दलेन डेल्ही-कैपिटल्स्-दलं अष्टक्रीडकानां-हानिपूर्वकं पराजितम्।

<u>प्रधानमन्त्री - परीक्षायां चर्चा</u>

यू.पी.एस.सी. आई.आई.टी. जे.ई.ई., सी.बी.एस.ई., आई.सी.एस.ई. सन्निभानां प्रतिष्ठित-परीक्षाणां शीर्ष-स्थान-भाजनी-भूतै: प्रत्याशिभि: "परीक्षा पे चर्चा" इति कार्यक्रमस्य अष्टमे अन्तिमे च संस्करणे निज-निज-सफलतानां कथा: विनिमयीकृताः। बोर्ड-परीक्षाणां शीर्ष-स्थान-भाजनी-भूतै: छात्रैः प्रोक्तं यत् परीक्षाया: समये छात्रा: निज मस्तिष्केषु सर्वमपि ज्ञानं स्थापयितुं नैव शक्नुवन्ति, अत एव तेषु विशिष्ट-विषयेषु ध्यानस्य केन्द्रीकरणं सहाय्यप्रदं भवति यद्धि परीक्षासु प्राय: परिपृच्छ्यन्ते। एतै: परीक्षार्थिन: छात्रा: परामृष्टा: यत्ते विगत-वर्षाणां प्रश्नपत्राणामपि अध्ययनं नूनमेव कुर्यु:।

सी.बी.एस.ई इति अभिकरणस्य द्वाविंशत्युत्तर-त्रयोविंशत्युत्तर-द्वि-सहस्र-तमे वर्षे समनुष्ठितायां परीक्षायां शीर्षस्थान-भाजनी-भूता राधिका-सिंघलवर्या प्रत्यपादयत् यत्, पाठ्येतर-गतिविधयोऽपि महत्वपूर्णा: भवन्ति।

यतोहि अनेन गतिविधिना छात्राणाम् आत्मविश्वास: वर्धते। अस्माकं वार्ताहरो वर्णयति यत् विगतेषु वर्षेषु "परीक्षा पे चर्चा" कार्यक्रम: एक: अवसरत्वेन विकसित: अस्ति यस्योद्देश्य: परिवर्तनम् वर्तते।

## भूपेंद्र - जलवायुपरिवर्तनम्

पर्यावरण-वन-जलवायु-परिवर्तन-मन्त्री भूपेन्द्र यादव: उत्पादानां पुनः उपयोगस्य पुनश्चक्रणस्य च संवर्धनस्य आवश्यकतायां बलं प्रदत्तवान् । अद्य नव-दिल्ल्याम् ऐषम: अपशिष्ट-पुनश्चक्रणस्य जलवायु-परिवर्तनस्य च अष्टादशं सम्मेलनं सम्बोधयन्, श्रीयादव: सप्त-चत्वारिंशदुत्तर-द्वि-सहस्र-तम वर्षं यावत् भारतं विकसितं राष्ट्रं विधातुं संसाधनानां दुरूपयोगम् अल्पीकर्तुं संसाधनदक्षताम् अधिकतमं कर्तुं च बलं प्रदत्तवान्।

## रूस-अमरीका

सऊदी-अरेबिया-देशस्य रियाद-नगरे अमेरिका-रूस-देशयोर्मध्ये मन्त्रणा आरब्धा। रूसदेशस्य विदेशमन्त्री **सर्गेई लावरोव:**, पुतिनस्य वरिष्ठसहायकः **यूरी उशाकोव:** च अमेरिकादेशस्य राज्यसचिवेन **मार्को रुबियो** इत्यनेन, राष्ट्रियसुरक्षा-परामर्शदात्रा **माइक् वाल्ट्ज:** इत्यनेन, पश्चिमैशिया-दूतेन **स्टीव् विट्कोफ़:** इत्यनेन च सह सम्भाषणं कुर्वन्तौ वर्तेते। यूक्रेन-देशस्य युद्धस्य समाप्त्यर्थं शान्ति-सन्धारण-विषये मार्गः प्रशस्तः भवेत् इति अस्याः मन्त्रणाया:

उद्देश्यः वर्तते। परञ्च यूक्रेन्-यूरोपीय-नेतराः मन्त्राणातः बहिष्कृताः सन्ति, तथा च यूक्रेनस्य राष्ट्रपतिः वोलोदिमिर् ज़ेलेन्स्की उक्तवान् यत्, यूक्रेन्-देशः तस्य सहभागितां विना किमपि अङ्गीकर्तुं न शक्नोति इति। अत्रान्तरे, वोलोदिमिर् ज़ेलेन्स्की अद्य तुर्की राष्ट्रपतिना रिसेप् तय्यप् एर्डोगन् इत्यनेन सह द्वन्द्वस्य विषये चर्चां कर्तुं तुर्की-देशं गतवान्, ततः एकदिनानन्तरं सऊदी-अरेबिया-देशं गमिष्यति।